Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

यहाँ से काटिए

No. of Questions – 18

No. of Printed Pages – 11

SS–12–Sanskrit Sah.

# उच्च माध्यमिक परीक्षा, 2025

## SENIOR SECONDARY EXAMINATION, 2025

## संस्कृतसाहित्यम्

समय : 3:15 (सपाद त्रिवादनम्)

पूर्णाङ्कः : 80

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

**परीक्षार्थिभ्यः सामान्य निर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रस्योपरि नामांकः अनिवार्यतः लेख्यः ।

2) सर्वे प्रश्नाः अनिवार्याः ।

3) प्रत्येकं प्रश्नस्योत्तरं उत्तरपुस्तिकायामेव देयम् ।

4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

यहाँ से काटिए



Visit CollegeDekho

## खण्डः – 'अ'

1) बहुविकल्पात्मक प्रश्ना :– [10 × 1 = 10]

i) ''कार्यं वा साधयेयम्, देहं वा पातयेयम्'' इति पाठः कुतः संकलितः? [1]

अ) रामायणतः

ब) शिवराजविजयतः

स) महाभारततः

द) उत्तररामचरिततः

ii) इह कानि कुर्वन् शतं समाः जिजीविषेत्? [1]

अ) कर्माणि

ब) पठनानि

स) भ्रमणानि

द) भोजनानि

iii) शरद्घनं कः नार्दति? [1]

अ) मयूरः

ब) पिकः

स) चातकः

द) काकः

iv) सततं कानि क्षीयन्ते? [1]

अ) पुस्तकानि

ब) वस्त्राणि

स) धनानि

द) भूषणानि

v) शब्दज्ञानानुपाती वस्तुशून्यः को ऽस्ति? [1]

अ) विकल्पः

ब) निद्रा

स) आगमः

द) अभावः



Visit CollegeDekho

vi) श्रीनायारः कस्य अधीने वर्षत्रयेभ्यः कार्यं करोति? [1]

अ) विहार सर्वकारस्य

ब) राजस्थान सर्वकारस्य

स) ओडिशा सर्वकारस्य

द) केन्द्र सर्वकारस्य

vii) प्रीतिलक्षणं कतिविधम्? [1]

अ) त्रिविधम्

ब) षड्विधम्

स) सप्तविधम्

द) पञ्चविधम्

viii) ''पापान्निवारयति योजयते हिताय'' इत्यत्र किं छन्दः? [1]

अ) वसन्ततिलका

ब) मालिनी

स) उपजातिः

द) आर्या

ix) ''शकृत्'' इत्यस्य शब्दस्य कोऽर्थः? [1]

अ) अजस्रम्

ब) एकवारम्

स) जलम्

द) पुरीषम्

x) ''अध्यवसायस्य सिद्धत्वे'' कोऽलङ्कारः निगद्यते? [1]

अ) श्लेषः

ब) रूपकम्

स) अतिशयोक्तिः

द) उत्प्रेक्षा



Visit CollegeDekho

**2)** यथानिर्देशं प्रकृतिप्रत्ययौ योजयित्वा रिक्तस्थानानि पूरयत – **[4 × 1 = 4]**

i) श्रीनायारः पत्रमेकं ............ आसीत् । (पठ् + शतृ) **[1]**

ii) सः ............ अधिकारं दत्तवान् । (जीव् + तुमुन्) **[1]**

iii) बालकस्य ............. प्रशंसनीया । (पटु + तल्) **[1]**

iv) सदा स्वच्छं जलं ............. । (पा + यत्) **[1]**

**3)** अतिलघूत्तरात्मक प्रश्नाः – **[10 × 1 = 10]**

i) भवभूतेः सर्वोत्कृष्टा रचना का ? **[1]**

ii) श्रीमद्भगवद्गीतायां कति अध्यायाः सन्ति? **[1]**

iii) महाकवि बाणभट्टस्य कथाकाव्यं किम्? **[1]**

iv) महाभाष्यं केन रचितम्? **[1]**

v) वेदस्य सारः कुत्र समाहितो वर्तते? **[1]**

vi) 'जयपुरविलासः' इति खण्डकाव्यं केन रचितम्? **[1]**

vii) 'गोविन्द वैभवम्' इति भक्तिकाव्यस्य रचयिता कः? **[1]**

viii) 'यात्राविलासः' इति प्रौढः उपन्यासः केन रचितः? **[1]**

ix) आचार्य मधुकर शास्त्रिणः महाकाव्यस्य नाम किम्? **[1]**

x) 'मोहभङ्गम्' नामकं प्रसिद्धं महाकाव्यं केन लिखितम्? **[1]**

**4)** अधोलिखित–श्लोकांशस्य अलङ्कारलक्षणं लिखत । **[1]**

निः श्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ।



Visit CollegeDekho

## खण्डः – 'ब'

5) अधोलिखितयोः – छन्दसोः एकस्य छन्दसः लक्षणमुदाहरणञ्च लिखत – [2]

क) उपजातिः

ख) शिखरिणी

6) अधोलिखितः श्लोकांशयोः एकस्य गणचिह्नं प्रदर्शयन् छन्दसः नामोल्लेखं कुरुत । [2]

क) हिमालयो नाम नगाधिराजः ।

ख) मनसि वचसि काये पुण्यपीयूषपूर्णा ।

7) अधोलिखित–श्लोकांशयोः एकस्य हिन्दीभाषायां सप्रसङ्गं भावार्थं लिखत । [2]

क) कोटीश्चतस्रो दश चाहर ।

ख) क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ।

8) अधोलिखित श्लोकस्य अन्वयं लिखत । [2]

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ।।

9) अधोलिखितपदानां सूत्रोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत । [2 + 2 = 4]

क) अनेजदेकम्

ख) नरेन्द्रः

10) अधोलिखितम् अपठितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत । [8]

यो मनुष्यो यत्र जन्म लभते, सा तस्य जन्मभूमिः । जन्मभूमिः मनुष्यस्य सर्वदैव आदरस्य पात्रं भवति । यत्र कुत्रापि गतो मनुष्यों जन्मभूमिं सदा स्मरत्येव । भारतवर्षमिदमस्माकं जन्मभूमिः । भारतवर्षं चास्माकं देशः । स्वदेशस्य कृते सर्वेषां हृद्ये सम्मानम् आदरश्च भवतः । अद्यत्वे संसारे सर्वे देशाः स्वदेशस्योन्नतिसाधने संलग्नाः सन्ति । वयं भारतीयाः साम्प्रतं स्वाधीनाः स्मः । अधुना सर्वस्मिन् संसारे भारतवर्षस्य आदरो भवति ।

क) एकपदेन उत्तरत– [1]

अस्माकं जन्मभूमिः का?

ख) पूर्णवाक्येन उत्तरत – [2 + 2 = 4]

i) अद्यत्वे सर्वे देशाः कुत्र संलग्नाः सन्ति?

ii) अधुना कुत्र भारतवर्षस्य आदरो भवति?

ग) भाषासम्बद्धकार्यम्– [1 + 1 = 2]

i) वयं भारतीयाः स्वाधीनाः स्मः । इत्यत्र क्रियापदं किम्?

ii) मनुष्यः सदा जन्मभूमिं स्मरति । इत्यत्र कर्तृपदं लिखत–

घ) उपर्युक्त–गद्यांशस्य समुचितं शीर्षकं लिखत । [1]



Visit CollegeDekho

## <u>खण्ड: – 'स'</u>

11) अद्योलिखितं पठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत। **[5]**

तावदकस्मादुत्थितो महान् झञ्झावात: एक: सायं समयप्रयुक्त: स्वभाववृत्तोऽन्धकार:, स च द्विगुणितो मेघमालाभि:। झञ्झावातोद्धूतै: रेणुभि: शीर्णपत्रै: कुसुमपरागै: शुष्कपुष्पैश्च पुनरेष द्वैगुण्यं प्राप्त: । इह पर्वत–श्रेणीत: पर्वतश्रेणी: वनाद् वनानि, शिखराच्छिखराणि प्रपातात् प्रपातान्, उपत्यकात उपत्यका: न कोऽपि सरलो मार्ग:, नानुद् भेदिनी भूमि:, पन्था: अपि च नावलोक्यते ।

क) एकपदेन उत्तरत– **[1]**

अकस्मात् क: उत्थित:?

ख) पूर्णवाक्येन उत्तरत– **[2]**

अन्धकार: काभि: द्विगुणित:?

ग) भाषासम्बद्धकार्यम्– **[1]**

i) "न कोऽपि सरलो मार्ग:" । इत्यत्र विशेषणपदं किम्?

अ) न　　ब) अपि

स) सरल:　　द) मार्ग:

ii) "पन्था: अपि च नावलोक्यते"। इत्यत्र कर्तृपदं लिखत– **[1]**

अ) पन्था:　　ब) अपि

स) च　　द) अवलोक्यते

अथवा

चतुर्णां परस्परं विवादो लग्न: । ततो ब्राह्मणो राजसमीपमागत्य चतुर्णां विवादवृत्तान्तम कथयत् । राजापि तत् श्रुत्वा तस्मै ब्राह्मणाय चत्वार्यपि रत्नानि ददौ । इति कथां कथयित्वा पुत्तलिका राजानमवदत्, भो राजन् । त्वय्येवंविध – सहजमौदार्यं विद्यते चेदस्मिन् सिंहासने समुपविश । तत् श्रुत्वा राजा तूष्णीमासीत् ।

क) एकपदेन उत्तरत–

कस्मै रत्नानि ददौ? **[1]**

ख) पूर्णवाक्येन उत्तरत–

ब्राह्मण: राजसमीपमागत्य किम् अकथयत्? **[2]**



Visit CollegeDekho

ग) भाषासम्बद्धकार्यम्–

i) ‘‘त्वयि सहजमौदार्यं विद्यते । इत्यत्र वाक्ये विशेष्यपदं किम्? [1]

अ) त्वयि | ब) विद्यते

स) सहजम् | द) औदार्यम्

ii) तत् श्रुत्वा राजा तूष्णीमासीत् । [1]

इत्यत्र क्रियापदं लिखत–

अ) तत् श्रुत्वा | ब) आसीत्

स) तूष्णीम् | द) राजा

12) अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत । [5]

सहसा विदधीत न क्रियामविवेक: परमापदां पदम् ।

वृणते हि विमृश्यकारिणं गुणलुब्धा: स्वयमेव सम्पद: ।।

क) एकपदेन उत्तरत– [1]

सहसा किं न विदधीत?

ख) पूर्णवाक्येन उत्तरत– [2]

परमापदां पदं क:?

ग) भाषिककार्यम् –

i) सम्पद: विमृश्यकारिणं हि वृणते । [1]

इत्यस्मिन् वाक्ये कर्तृपदं किम्?

अ) वृणते | ब) सम्पद:

स) विमृश्यकारिणम् | द) हि

ii) गुणलुब्धा: सम्पद: हि वृणते । [1]

इत्यत्र विशेषणपदं लिखत–

अ) गुणलुब्धा: | ब) हि

स) सम्पद: | द) वृणते

अथवा



Visit CollegeDekho

असुर्या नाम ते लोका अन्धेन तमसावृता: ।

ताँस्ते प्रेत्यामिगच्छन्ति ये के चात्महनोजना: ।।

क) एकपदेन उत्तरत– [1]

ते लोका: के?

ख) पूर्णवाक्येन उत्तरत– [2]

ते लोका: केन आवृता:?

ग) भाषिककार्यम्–

i) ताँस्ते प्रेत्याभिगच्छन्ति । इत्यत्र कर्तृपदं किम्? [1]

अ) तान् ब) ते

स) अभिगच्छन्ति द) प्रेत्य

ii) ये के आत्महनो जना: । इत्यत्र विशेष्यपदं लिखत– [1]

अ) ये ब) आत्महन:

स) के द) जना:

13) अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत । [5]

सागरिका – क: तात्पर्य: अस्य एतादृशस्य दीर्घवाक्यस्य? किञ्चिदपि नावगम्यते ...............

योगाचार्य: – अलं चिन्तया, एकैकं कृत्वा बोधयामि ।

यम: – अहिंसासत्यास्तेय ब्रह्मचर्यापरिग्रहा: यमा: ।

नियम: – शौचसन्तोषतप: स्वाध्यायेश्वर प्रणिधानानि नियमा: ।

आसनम् – स्थिरसुखमासनम् ।

प्राणायाम: – तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेद: प्राणायाम: ।

प्रत्याहार: – स्वविषयसम्प्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहार: ।

धारणा – देशबन्धश्चित्तस्य धारणा ।

ध्यानम् – तत्र प्रत्ययैकतानता ध्यानम् ।

समाधि : – तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधि: ।

क) एकपदेन उत्तरत – [1]

का धारणा?

ख) पूर्णवाक्येन उत्तरत – [2]

के यमा:?



Visit CollegeDekho

ग) भाषिककार्यम् –

i) स्थिरसुखमासनम् इति कथयन्ति । [1]

इत्यत्र विशेष्यपदं किम्?

अ) इति  ब) कथयन्ति

स) आसनम्  द) स्थिरसुखम्

ii) अलं चिन्तया, एकैकं कृत्वा बोधयामि । [1]

अस्मिन् वाक्ये क्रियापदं लिखत –

अ) चिन्तया  ब) एकैकम्

स) कृत्वा  द) बोधयामि

अथवा

अरून्धती: – अतिजवेन दूरमतिक्रान्त: स चपल: कथं दृश्यते?

बटव: – पश्यतु कुमारस्तावदाश्चर्यम् ।

लव: – दृष्टमवगतं च । नूनमा श्वमेधिकोऽ यमश्व : ।

बटव: – कथं ज्ञायते?

लब: – ननु मूखी: ! पठितमेव हि युष्माभिरपि तत् काण्डम् । किं न पश्यथ? प्रत्येकं शतसंख्या: कवचिनो दण्डिनो निषङ्गिणश्च रक्षितार: यदि च विप्रत्ययस्तत्पृच्छत ।

क) एकपदेन उत्तरत – [1]

स: चपल: कथं दूरमतिक्रान्त:?

ख) पूर्णवाक्येन उत्तरत – [2]

रक्षितार: कीदृशा: सन्ति?



Visit CollegeDekho

ग) भाषिककार्यम् –

i) नूनमाश्वमेधिकोऽयमश्वः। [1]

इत्यत्र विशेष्यपदं किम्?

अ) अश्वः   ब) नूनम्

स) अयम्   द) आश्वमेधिकः

ii) तत्काण्डं किं न पश्यथ? इत्यत्र क्रियापदं किम्? [1]

अ) तत्काण्डम्   ब) किम्

स) पश्यथ   द) न

14) रेखाङ्कितपदेषु प्रश्ननिर्माणं कुरूत। (केषाञ्चित् त्रयाणाम्) [3×1=3]

क) तस्य राज्येन सह कश्चित् सम्पर्कः नास्ति।

ख) मरालस्य मानसं न रमते।

ग) अष्टौ गुणाः पुरूषं दीपयन्ति।

घ) त्वं कर्म कुरू।

ङ) अविद्यया मृत्युं तरति।

15) अधोलिखितयोः अलङ्कारयोः कस्यचिद् एकस्य लक्षणम् उदाहरणञ्च लिखत। [3]

क) श्लेषः

ख) व्याजस्तुतिः

## खण्डः – 'द'

**16)** अधोलिखितरेखाङ्कितपदान् आधारीकृत्य विभक्तिं तत्कारणञ्च लिखत– (केषाञ्चित् चतुर्णाम्) **[4×1=4]**

क) शिष्यः गुरूं प्रति नमस्करोति ।

ख) पत्नी स्वपतिना सह आपणं गतवती ।

ग) ग्रामम् उभयतः वृक्षाः सन्ति ।

घ) अलं बिवादेन ।

ङ) जनकाय नमः ।

च) धनात् ज्ञानं गुरूतरम् ।

**17)** निम्नलिखितेषु कमपिविषयं स्वीकृत्य 50 - 60 शब्देषु संस्कृतभाषायां निबन्धं लिखत। **[5]**

क) संस्कृते विज्ञानम् ।

ख) महाकविः कालिदासः ।

ग) संस्कृतदिवसः ।

**18)** अधोलिखित वाक्यानां संस्कृतभाषायाम् अनुवादः करणीयः । (केषाञ्चित् पञ्चानाम्) **[5 × 1 = 5]**

क) हम सब पढ़कर खेलते हैं ।

ख) छात्रों ने क्यों नहीं पढ़ा ?

ग) ईश्वर ने रक्षा की ।

घ) तुम वहाँ जाओं ।

ङ) नदियों में गङ्गा पवित्र है ।

च) विष्णु वैकुण्ठ में वास करते हैं ।

छ) ग्राम के दोनों ओर वन है ।

ज) विद्या से यश होता है ।

◆ ◆ ◆



Visit CollegeDekho

DO NOT WRITE ANYTHING HERE

Visit CollegeDekho